# Shri Bhramaramba Ashtakam

# શ્રીભ્રમરામ્બાષ્ટકમ્

## Document Information

Text title : Shri Bhramaramba Ashtakam 3

File name : bhramarAmbAShTakam3.itx

Category : devii, aShTaka, otherforms, devI

Location : doc_devii

Proofread by : Vani V.

Latest update : July 22, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 23, 2023

*sanskritdocuments.org*

# શ્રીભ્રમરામ્બાષ્ટકમ્

શ્રીકાન્તસ્તુતસદ્ગુણાઞ્ચિતપદાં સિદ્ધર્ષિસંસેવિતાં
બાલેન્દુદ્યુતિપાદપલ્લવયુતાં બ્રહ્માણ્ડસઞ્ચારિણીમ્ ।
ચારુશ્રીકલશાતપત્રકમહાસૌભાગ્યરેખાઙ્ઘ્રિકાં
શ્રીશૈલભ્રમરામ્બિકાં શિવયુતાં ચિન્માત્રમૂર્તિં ભજે ॥ ૧॥

પાદામ્ભોરુહમધ્યમાનમહિષામ્ભદ્રાયમાનોદયાં
કૂર્માકારપદોપરિસ્થલરુચિં ઘોરાન્ધકારાપહામ્ ।
જલધાનિર્મિતમાન્મધેયશરધિં જમ્બૂફલશ્રીમયીં
શ્રીશૈલભ્રમરામ્બિકાં શિવયુતાં ચિન્માત્રમૂર્તિં ભજે । ૨॥

જાનુશ્રીજિતકુમ્ભિકુમ્ભવિભવાં ચણ્ડીં મહાયોગિનીં
રમ્ભારમ્ભકરાધરોરુ યુગલાં રત્નાસનસ્થાયિનીમ્ ।
શ્રીચક્રાઙ્કિતચક્રવિભ્રમકટીં સિન્દૂરવર્ણોજ્જ્વલાં
શ્રીશૈલભ્રમરામ્બિકાં શિવયુતાં ચિન્માત્રમૂર્તિં ભજે ॥ ૩॥

ભર્માનિર્મિતદિવ્યરત્નદલનાં ભવ્યામ્બરાલઙ્કૃતાં
સૌન્દર્યોધકપૂર્ણનાભિસરસીં શાતોલ્લસન્મધ્યમામ્ ।
વક્શોજદ્વયશાતકુમ્ભકલશાં વશ્યાદિ મન્ત્રાત્મિકાં
શ્રીશૈલભ્રમરામ્બિકાં શિવયુતાં ચિન્માત્રમૂર્તિં ભજે ॥ ૪॥

કણ્ઠાલમ્બિતતારહારપટલાં કૈવલ્યસન્દાયિનીં
શોભાજાલમૃણાલબાહુડમરુ સ્થૂલાબ્જચક્રાઙ્કિતામ્ ।
સદ્બિમ્બાધરરક્તકુન્દવદનાં સ્વારસ્ય સમ્ભાષિણીં
શ્રીશૈલભ્રમરામ્બિકાં શિવયુતાં ચિન્માત્રમૂર્તિં ભજે ॥ ૫॥

નક્ષત્રાધિકનાસિકામણિધરાં નવ્યારવિન્દેક્ષણાં
મુક્તાલઙ્કૃતકર્ણભૂષણયુગાં મુગ્ધપ્રતાપાન્વિતામ્ ।
આદર્શામલગણ્ડમણ્ડલધરામાનન્દપૂર્ણાન્તરાં
શ્રીશૈલભ્રમરામ્બિકાં શિવયુતાં ચિન્માત્રમૂર્તિં ભજે ॥ ૬॥

શ્રીબાલાં ચ સુગન્ધિગન્ધતિલકાં નવ્યદ્વિરેપાલકાં
    સીમન્તાયુતનદ્મૌક્તકસરાં શ‍ૃઙ્ગારરઙ્ગત્કચામ્ ।
ગાઙ્ગેયાચિતરત્નકઙ્કણઝણત્કારાગ્રહસ્તદ્વયાં
    શ્રીશૈલભ્રમરામ્બિકાં શિવયુતાં ચિન્માત્રમૂર્તિં ભજે ॥ ૭॥

સર્વાઙ્ગાભરણાં પ્રસન્નવદનાં સર્વેશ્વરીં સર્વદાં
    સર્વજ્ઞાં સજલાભ્રવિભ્રમતનું ભક્તપ્રિયામમ્બિકામ્ ।
મૌલિસ્થાપિતચન્દ્રશેખરવરાં માલ્યાર્પિતાઙ્ગાં શિવાં
    શ્રીશૈલભ્રમરામ્બિકાં શિવયુતાં ચિન્માત્રમૂર્તિં ભજે ॥ ૮॥

કલ્યાણીં કમલાસનસ્થચરણાં ગૌરીં ઘનશ્યામલા
    ગ્રૈવેયાકૃતહારનૂપુરધરાં કઞ્જાતપ્રાપ્તેક્ષણામ્ ।
ગઙ્ગાતુઙ્ગતરઙ્ગભાસવદનાં ગન્ધર્વગાનપ્રિયાં
    શ્રીશૈલભ્રમરામ્બિકાં શિવયુતાં ચિન્માત્રમૂર્તિં ભજે ॥ ૯॥

શ્રીશૈલભ્રમરામ્બિકાષ્ટકમિદં શ્રેયસ્કરં શાશ્વતં
    ચૈન્દ્રશ્રીકરમપ્રમેયમતુલં હર્ષપ્રદં બુદ્ધિદમ્ ।
પ્રભાતે નિયમાત્પઠેદ્યદિ પુમાન્ ભક્ત્યન્તરાત્મશુચિઃ
    શૌક્લીંશાન્તિમવાપ્નુયાત્રિજગતાં સર્વેશ્વરત્વં જયમ્ ॥ ૧૦॥

ઇતિ શ્રીભ્રમરામ્બાષ્ટકં સમાપ્તમ્ ।

Proofread by Vani V.

*Shri Bhramaramba Ashtakam*

pdf was typeset on July 23, 2023

Please send corrections to *sanskrit@cheerful.com*